## मितां ह्रस्वः । (९२/२५६८)

मितो धातवः 'घटादयो मितः' (सि.कौ.पृ. ७३२) [1]इत्येवमादयो ये प्रतिपादिताः, तेषामुपधाया ह्रस्वो भवति णौ [2]परतः । घटयति । व्यथयति । जनयति । रजयति । शमयति । ज्ञपयति[3] । केचिदत्र वा इत्यनुवर्तयन्ति । सा च व्यवस्थितविभाषा । तेन उत्क्रामयति, सङ्क्रामयति इत्येवमादि सिद्धं [4]भवति ॥

## चिण्णमुलोर्दीर्घोऽन्यतरस्याम् । (९३/२७६२)

चिण्परे णमुल्परे च णौ परतः मितामङ्गानामुपधायाः दीर्घो भवति अन्यतरस्याम् । अशमि, [5]अशामि । अतमि, अतामि । शमंशमम्, शामंशामम् । तमन्तमम्, तामन्तामम् । [6]दीर्घग्रहणं किं, न ह्रस्व[7]विकल्प एव [8]विधीयते ? नैवं शक्यम्, शमयन्तं प्रयुङ्क्ते इति द्वितीये णिचि [9]ह्रस्वविकल्पो न स्यात् । [10]णिलोपस्य स्थानिवद्भावाद् दीर्घविधौ त्वजादेशो न स्थानिवत्[11] । शयमन्तं प्रयुक्तवान् । अशमि, अशामि । शमंशमम्, शामंशामम् । शंशमयतेः – अशंशमि, अशंशामि । शंशमंशंशमम्, शंशामंशंशामम् (म.भा. ३.२१२) । योऽसौ णौ णिर्लुप्यते, यश्च यङकारः, तयोर्दीर्घविधौ [12]आदेशो न स्थानिवद् भवति इति [13]अस्थानिवद्भावात् दीर्घः सिद्धो भवति । ह्रस्वविकल्पे तु [14]विधीयमाने स्थानिवद्भावः [15]स्यात् । णिण्यन्ते यङ्ण्यन्ते त्वसिद्धिरेव । व्याश्रयत्वाद[16]सिद्धत्वमपि नास्ति । णौ हि णियङोर्लोपः, चिण्णमुल्परे णावङ्गस्य दीर्घत्वम् ॥

## खचि ह्रस्वः । (९४/२९५५)

खच्परे णौ परतो ह्रस्वो भवति अङ्गस्य उपधायाः । द्विषन्तपः । परन्तपः । [17]पुरंदरः ॥

## ह्लादो निष्ठायाम् । (९५/३०७३)

ह्लादोऽङ्गस्य उपधायाः ह्रस्वो भवति निष्ठायां परतः । [18]प्रह्लन्नः । प्रह्लन्नवान् । निष्ठायाम् इति किम् ? प्रह्लादयति । [19]ह्लादः इति योगविभागः क्रियते, [20]क्तिन्यपि यथा स्तात्, प्रह्लत्तिः इति ॥

## छादेर्घेऽद्व्युपसर्गस्य । (९६/३२०७)

छादेरङ्गस्य अद्व्युपसर्गस्य घप्रत्यये परतः उपधायाः ह्रस्वो भवति । [21]उरश्छदः । प्रच्छदः । [22]दन्तच्छदः । णिलोपस्यासिद्धत्वं स्थानिवद्भावो वा वचनसामर्थ्यादत्र[23] न भवति इति ह्रस्वभाविनी उपधा भवति । अद्व्युपसर्गस्य इति किम् ? समुपच्छादः ।

[७८७] अद्विप्रभृत्युपसर्गस्य इति वक्तव्यम् । (म.भा. ३.२१३)

[24]समुपातिच्छादः । उत्तरा हि सङ्ख्या पूर्वसङ्ख्याकृतं व्यपदेशं निवर्तयति, नहि त्रिपुत्रो द्विपुत्रः इति [25]व्यपदिश्यते ॥

---

1. इत्येवमादिना प्रतिपादिताः क.ह.इ. 2. परः क. 3. रमयति इत्यधिकम् ह. 4. भवति नास्ति फ. 5. नास्ति क. 6. दीर्घग्रहणम् – प्रयुक्तवान् नास्ति ह. 7. विकल्प नास्ति फ. 8. विकल्प्यते फ. 9. विकल्पो क. 10. णिलोपस्य – स्थानिवत् नास्ति क. 11. भवति इति दीर्घः सिद्धो भवति इत्यधिकम् फ. 12. अजादेशो क.ह.इ. 13. अस्थानिवत्वात् क. 14. विधीयमानस्थानिवद्भावः ह. 15. स्यात् नास्ति फ. 16. असिद्धिः इ. 17. नास्ति इ. 18. प्रह्लणः प्रह्लणवान् ह. 19. वाक्यमिदं नास्ति ब.ह. 20. क्तिन्यपि ह. 21. तनुच्छदः फ. 22. परिच्छदः फ. 23. अत्र नास्ति फ. 24. समुपाभिच्छादः इ.ह. 25. अत्र अभिधीयते फ.